International Journal of Sanskrit Research 2017; 3(6): 25-28

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2017; 3(6): 25-28
© 2017 IJSR
www.anantaajournal.com
Received: 08-09-2017
Accepted: 09-10-2017

**Naveen Bhat**
Research Student,
Uppinapattana, Kumta,
Rajiv Gandhi Campus, Sringeri,
Rastriya Sanskrit Sansthan,
Delhi, India

**Correspondence**
**Naveen Bhat**
Research Student,
Uppinapattana, Kumta,
Rajiv Gandhi Campus, Sringeri,
Rastriya Sanskrit Sansthan,
Delhi, India

# "नाट्यशास्त्रोक्त–नाट्यसङ्ग्रहः" एकः विमर्शः

**Naveen Bhat**

**प्रस्तावना**

मुनिभिः पृष्टः भरतमुनिः रसाः, भावाः, अभिनयाः, धर्मी, वृत्तयः, प्रवृत्तयः, सिद्धी, स्वराः, अतोद्यानि, गानानि, रङ्गानि चेति नाट्यस्य एकादशाङ्गानि वक्ति । तदेवम् "रसाभावा ह्यभिनयाः धर्मीवृत्तिप्रवृत्तयः। सिद्धिःस्वरा तथातोद्यं गानं रङ्गश्च सङ्ग्रहः॥" [i] इति। एते एव भरतमुनेः नाट्यशास्त्रे विस्तृततताया विवृणीतानि। अभिनवगुप्तस्य मतमेवमस्ति "अभिनयत्रयं गीतातोद्ये चेति पञ्चाङ्गं नाट्यम् । अनेन तु श्लोकेन कोहलमतेनैकादशाङ्गत्वमुच्यते । नतु भतते" । केषुचित् नाट्यशास्त्रपुस्तकेषु पूर्वोक्तश्लोकेन सह अन्यतदेकं श्लोकः दृश्यते तत्र उपचारः मण्डपश्चेति त्रयोदशाङ्गत्त्वमुक्तम् । तदेवम् "उपचारस्तथा विप्रा मण्डपश्चेति सर्वशः । त्रयोदशविधो ह्येष ह्यादिष्टो नाट्यसङ्ग्रहः" इति । किन्त्वत्र भरतोक्तः एकदशनाट्यसङ्ग्रहः विमृश्यते ।

1.रसाः दृ शृङ्गाररसः, हास्यरसः, करुणारसः, वीररसः, रौद्ररसः, भयानकरसः, बीभत्सरसः, अद्भुतरसः इति नाट्ये अष्टौ रसाः उक्ताः भरतमुनिना। तदेवम् "शृङ्गारहास्यकरुणा वीररौद्रभयानकाः। बीभत्साद्भुतसंज्ञौ चेत्यष्टौ नाट्ये रसाः स्मृताः"[ii] ॥ इति। "न हि रसादृते कश्चिदर्थः प्रवर्तते" इति रसस्य महत्त्वमुक्त्वा "तत्र विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिः" [iii] इति रसलक्षणसूत्रं वक्ति [iv] । विभावानुभावव्यभिचारिभावसंयोगात् सहृदयेषु वर्तमानः स्थायीभावः रसत्वमाप्नोति। तत्कथमिति दृष्टान्तमाह "यथा हि नानाव्यञ्जनौषधिद्रव्यसंयोगाद्रसनिष्पत्तिः तथा नानाभावोपगमाद्रसनिष्पत्तिः। यथा हि दृ गुडादिभिर्द्रव्यैर्व्यञ्जनैरोषधिभिश्च षाडवादयो रसा निर्वर्त्यन्ते तथा नाना भावोपगता अपि स्थायिनो भावा रसत्वमाप्नुवन्ति।" अपि च "यथा बहुद्रव्ययुतैर्व्यञ्जनैर्बहुभिर्युतम् । आस्वादयन्ति भुञ्जाना भक्तं भक्तविदो जनाः ॥ भावाभिनयसम्बद्धान् स्थायिभावांस्तथा बुधाः । आस्वादयन्ति मनसा तस्मान्नाट्यरसाः स्मृताः॥ [v] इति।

2.भावाः – वाचिकाभिनयद्वारा, आङ्गिकाभिनयद्वारा, सात्त्विकाभिनयद्वारा च काव्यस्य अर्थं भावयन्ति इति भावाः । विभावेन योऽर्थः आहृतः सः अनुभावैः गम्यते अपि च आङ्गिकाभिनयैः वाचिकाभिनयैः सात्त्विकाभिनयैश्च भावः प्रतीतियोग्यः भवति । तदुक्तमेवम् "विभावेनाहृतो योऽर्थो ह्यनुभावैस्तु गम्यते । वागङ्गसत्त्वाभिनयैः स भाव इति संज्ञितः ॥ वागङ्गमुखरागेण सत्त्वेनाभिनयेन च । कवेरन्तर्गतं भावं भावयन् भाव उच्यते"॥ [vi] इति । भावस्त्रिविधः स्थायिभावाः, व्यभिचारिभावाः, सात्त्विकभावाः चेति ।

१.स्थायिभावाः दृ रतिः, हासः, शोकः, क्रोधः, उत्साहः, भयं, जुगुप्सा, विस्मयः चेति अष्टौ । तदुक्तम् "रतिर्हासश्च शोकश्च क्रोधोत्साहो भयं तथा । जुगुप्सा विस्मयश्चेति स्थायिभावाः प्रकीर्तिताः" ॥ [vii] इति ।

२.व्यभिचारिभावाः दृ निर्वेदः, ग्लानिः, शङ्का, असूया, मदः, श्रमः, आलयं, दैन्यं, चिन्ता, मोहः, स्मृतिः, धृतिः, लज्जा, चपलता, हर्षः, आवेगः, जडता, गर्वः, विषादः, औत्सुक्यं, निद्रा, अपस्मारः, सुप्तं, विबोधः, अमर्षः, अवहित्थम्, उग्रता, मतिः, व्याधिः, उन्मादः, मरणं, त्रासः, वितर्कः चेति त्रयस्त्रिंशत् । तदुक्तम् "निर्वेदग्लानिशङ्काख्यास्तथासूया मदः श्रमः । आलस्यं चौव दैन्यं च चिन्ता मोहः स्मृतिर्धृतिः ॥ व्रीडा चपलता हर्ष आवेगो जडता तथा । गर्वो विषाद औत्सुक्यं निद्रापस्मार एव च ॥ सुप्तं विबोधोऽमर्षश्चाप्यवहित्थमथोग्रता । मतिर्व्याधिस्तथोन्मादस्तथा मरणमेव च ॥त्रासश्चौव वितर्कश्च विज्ञेया व्यभिचारिणः । त्रयस्त्रिंशदमी भावाः समाख्यातास्तु नामतः" ॥ [viii] इति ।

३.सात्त्विकभावाः दृ स्तम्भः, स्वेदः, रोमाञ्चः, स्वरभङ्गः, वेपथुः, वैवर्ण्यम्, अश्रुः, प्रलयः इत्यष्टौ । तदुक्तम् "स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः । वैवर्ण्यमश्रुप्रलय इत्यष्टौ सात्त्विकः स्मृताः" ॥ [ix] इति।

3.अभिनयाः – अभिनयस्य व्युत्पत्तिं कथयति । तदेवम् " अभीत्युपसर्गः णीञ् इति प्रापणार्थको धातुः । अस्याभिनीत्येवं व्यवस्थितस्य एरजित्यच्प्रत्ययान्तस्याभिनय इयेवं रूपं सिद्धम् । एतच्च धात्वर्थानुवचनेनावधार्यं भवति । अत्र श्लोकौ दृ अभिपूर्वस्तु णीञ् धातुराभिमुख्यार्थनिर्णये ।

यस्मात्पदार्थान्नयति तस्मादभिनयः स्मृतः ॥ विभावयति यस्माच्च नानार्थान् हि प्रयोगतः । शाखाङ्गोपाङ्गसंयुक्तस्तस्मादभिनयःस्मृतः ॥" [x] इति । सोऽयमभिनयः आङ्गिकः, वाचिकः, सात्विकः आहार्यश्चेति चतुर्विधः। तदुक्तम् दृ "आङ्गिको वाचिकश्चौव ह्याहार्यः सात्त्विकस्तथा । ज्ञेयास्त्वभिनयो विप्राः चतुर्धा परिकल्पितः ॥ [xi]" इति । तेषां लक्षणं सङ्क्षेपेणोक्तं नन्दिकेश्वरेण दृ चतुर्धाभिनयस्तत्र आङ्गिकोऽङ्गैर्निदर्शितः । वाचा विरचितः काव्यनाटकादि तु वाचिकः ॥ आहार्यो हारकेयूरवेषादिभिरलङ्कृतिः । सात्त्विकः सात्त्विकैर्भावैर्भावज्ञेन विभावितः ॥ [xii]" इति ।

4.धर्मिणौ दृ लोकधर्मी नाट्यधर्मी चेति द्विविधा धर्मी उक्ता भरतमुनिना। तदेवम् "धर्मी या द्विविधा प्रोक्ता मया पूर्वं द्विजोत्तमाः। लौकिकी नाट्यधर्मी च तयोर्वक्ष्यामि लक्षणम् ॥ **[xiii]** इति ।

**१.लोकधर्मी** दृ स्वाभाविकभावैः युक्तं, शुद्धं तथा अविकृतं, लोकव्यवहारैः युक्तं अङ्गलीलाविवर्जितं स्वाभाविकाभिनयोपेतं नाट्यं लोकधर्मीति कथ्यते । तदुक्तम् "स्वभावोपगतं शुद्धं त्वविकृतं तथा । लोकवार्ताक्रियोपेतमङ्गलीलाविवर्जितम् ॥ स्वभावाभिनयोपेतं नानास्त्रीपुरुषाश्रयम् । यदीदृशं भवेन्नाट्यं लोकधर्मी तु सा स्मृता" ॥ [xiv] इति । अर्थात् लोकधर्म्यां नित्यजीवने यथा वयं भवेम तथैव नाट्येऽपि भवेम । नित्यजीवने यथा अङ्गानां सञ्चारः भवति तद्व्यतिरिक्तसञ्चारः न भवति अपि च अभिनये मुद्राणामुपयोगः लोकधर्म्यां नास्ति ।

**२.नाट्यधर्मी** दृ अतिवाक्ययुक्तम्, अतिक्रियोपेतम्, अतिसत्त्वयुतम्, अतिभावयुतम् [xv] , लीलायुतम्, अङ्गहाराणाम् अभिनययुतं, नाट्यलक्षणसंयुक्तं, स्वरालङ्कारसंयुक्तं [xvi] , अस्वस्थपुरुषाश्रं [xvii] नाट्यं नाट्यधर्मीति कथ्यते इत्युक्तम् । तदेवम् "अतिवाक्यक्रियोपेतमतिसत्त्वातिभावकम् । लीलाङ्गहाराभिनयं नाट्यलक्षणलक्षितम् ॥ स्वरालङ्कारसंयुक्तमस्वस्थपुरुषाश्रयम् । यदीदृ शं भवेन्नाट्यं नाट्यधर्मी तु सा स्मृता"॥ लोकप्रसिद्धं द्रव्यन्तु यदा नाट्ये प्रयुज्यते । मूर्तिमत् साभिलाषञ्च नाट्यधर्मी तु सा स्मृता ॥ आसन्नोक्तं तु यद्वाक्यं न शृण्वन्ति परस्परम् । अनुक्तं श्रूयते वाक्यं नाट्यधर्मी तु सा स्मृता ॥ शैलयानविमानानि चर्मवर्मायुधध्वजाः । मूर्तिमन्तः प्रयुज्यन्ते नाट्यधर्मी तु सा स्मृता ॥ य एकां भूमिकां कृत्वा कुर्वीतैकान्तरेऽपराम् । कौशल्यादेककत्वाद्वा नाट्यधर्मीति सा स्मृता ॥ यागम्या प्रमदा भूत्वा गम्या भूमिषु युज्यते । गम्या भूमिष्वगम्या च नाट्यधर्मी तु सा स्मृता ॥ ललितैरङ्गविन्यासैस्तथोत्क्षिप्तपदक्रमैः । नृत्यते गम्यते यच्च नाट्यधर्मी तु सा स्मृता ॥ योऽयं स्वभावो लोकस्य सुखदुःखक्रियात्मकः । सोऽङ्गाभिनयसंयुक्तो नाट्यधर्मी तु सा स्मृता ॥ यश्चेतिहासवेदार्थो ब्रह्मणा समुदाहृतः । दिव्यमानुषरत्यर्थं नाट्यधर्मी तु सा स्मृता ॥ [xviii] इति । नाम्ना एव ज्ञायते यत् नाट्यधर्म्यां सर्वेऽपि लोकव्यवहारापेक्ष्या प्रथगेव वर्तन्ते अपि च नाट्यात्मकं भवन्ति । तदेव विवरणं भरतमुनिना दत्तम् ।

**5.वृत्तयः दृ** भारती, सात्त्वाती, कैशिकी, आरभटीति वृत्तिः चतुर्विधा । मधुकैटभवधसन्दर्भे विष्णुना वृत्तयः समुद्भूताः । ताः वेदेषु निक्षिप्य ब्रह्मा ऋग्वीदाद्भारतीं, यजुर्वेदात्सात्त्वतीं, सामवेदात् कैशिकीम् अथर्वणवेदात् आरभाटीञ्च सङ्गृहीतवान् इति नाट्यशास्त्रम्। [xix]

**१.भारतीवृत्तिः** दृ या वृत्तिः वाग्व्यापारप्रधाना , पुरुषैः एव प्रयोज्या अर्थात् स्त्रीभिः वर्जिता, संस्कृतपाठ्ययुक्ता, भरतैः स्वनामधेयैः [xx] प्रयुक्ता सा वृत्तिः कैशिकीत्युक्तम् । तदेवम् "या वाक्प्रधाना पुरुषप्रयोज्या स्त्रीवर्जिता संस्कृतपाठ्ययुक्ता । स्वनामधेयैर्भरतैः प्रयुक्ता सा भारती नाम भवेत्तु वृत्तिः" ॥ [xxi] इति । सेयं भारतीवृत्तिः प्ररोचना, आमुखं, वीथी, प्रहसनञ्चेति चतुर्भेदयुक्ता इत्युक्तम्। [xxii]

**२.सात्त्वतीवृत्तिः** दृ या वृत्तिः सात्त्वतेन गुणेन युक्ता, [xxiii] न्यायेन वृत्तेन समन्विता, हर्षोत्कटशोकभावरहिता सा वृत्तिः सात्त्वती इत्युक्तम् । तदेवम् "या सात्त्वतेनेह गुणेनयुक्ता न्यायेन वृत्तेन समन्विता च । हर्षोत्कटा संहृतशोकभावा सा सात्त्वती नाम भवेत्तु वृत्तिः" ॥ [xxiv] इति । इयं वृत्तिरपि उत्थापकः, परिवर्तकः, सल्लापकः, सङ्घात्यश्चेति चतुर्विधा। [xxv]

**३.कैशिकीवृत्तिः** दृ या वृत्तिः विशेषचित्रनेपथ्ययुक्ता, स्त्रीभिः संयुता, बहुनृत्यगीतयुता, कामोपभोगप्रभवोपचारा शृङ्गाररसात्मकव्यापारयुता सा वृत्तिः कैशिकीत्युक्तम् । तदेवम् "या श्लक्ष्णनेपथ्यविशेषचित्रा स्त्रीसंयुता या बहुनृत्यगीता । कामोपभोगप्रभवोपचारा तां कैशिकीं वृत्तिमुदाहरन्ति" ॥ [xxvi] इति । सेयं कैशिकीवृत्तिरपि नर्म, नर्मस्फुञ्जः, नर्मस्फोटः, नर्मगर्भश्चेति चतुर्विधा इत्युक्तम्। [xxvii]

**४.आरभटीवृत्तिः** दृ या वृत्तिः आरभटगुणप्राया, बहुकपटवञ्चनयुता, दम्भानृतवचनयुता सावृत्तिः आरभटीत्युच्यते । तदुक्तमेवम् "आरभटप्रायगुणा तथैव बहुकपटवञ्चनोपेता । दम्भानृतवचनवती त्वारभटी नाम विज्ञेया" ॥ [xxviii] इति । सेयेम् आरभटी वृत्तिः सङ्क्षिप्तकः, अवपातः, वस्तूत्थापनं, संफेटश्चेति चतुर्विधा। [xxix]

**6.प्रवृत्तयः –** पृथिव्यां बहवः देशाः सन्ति । तत्र वेष–भाषा–वार्ता–भूषणाचारेषु वैविध्यं दृश्यते । तद्वैविध्यं प्रख्यापयति [30] अर्थात् प्रसिद्धिं करोतीति प्रवृत्तिः । सा आवन्ती, दाक्षिणात्या, पाञ्चाली, औढ्रमागधी चेति चतुर्विधा । तदुक्तम् चतुर्विधा प्रवृत्तिश्च प्रोक्ता नाट्यप्रयोगतः । आवन्ती दाक्षिणात्या च पाञ्चाली चौढ्रमागधी" ॥ [xxx] इति।

**१.दाक्षिणात्या प्रवृत्तिः** दृ एषा प्रवृत्तिः बहुनृत्यगीतवाद्ययुता , प्रायेण कैशिकी वृत्त्याश्रिता , चतुरमधुरललिताङ्गाभिनययुता च । महेन्द्रः, मलयः, सह्यः, मेकलः, पालमञ्जरः एतेषु पर्वतप्रदेशेषु श्रिताः देशाः दक्षिणापथः इति कथ्यते । कोसलः, तोसलः, कलिङ्गः, यवनः, खसः, द्रविडः, आन्ध्रः, महाराष्ट्रः, वैष्णः, वनवासजः, अपि च दक्षिणसमुद्रस्य विन्ध्यपर्वतस्य चान्तरे स्थिताः देशाः दाक्षिणात्यां प्रवृत्यां योजयेयुः । तदुक्तम् "तत्र दक्षिणात्यास्तावत् बहुनृत्यगीतवाद्या कैशिकीप्रायाः चतुरमधुरललिताङ्गाभिनयाश्च । तद्यथा दृ महेन्द्रो मलयः सह्यो मेकलः पालमञ्जरः । एतेषु ये श्रिताः देशाः स ज्ञेयो दक्षिणापथः ॥ कोसलस्तोशलाश्चैव कलिङ्गा यवना खसाः । द्रविडान्ध्रमहाराष्ट्रा वैष्णा वै वानवासजाः । दक्षिणस्य समुद्रस्य तथा विन्ध्यस्य चान्तरे । ये देशास्तेषु युञ्जीतदाक्षिणात्यां तु नित्यशः॥ [xxxi]" इति।

**२. आवान्ती प्रवृत्तिः** दृ एषा प्रवृत्तिः सात्त्वतीं कैशिकीं वृत्तिं समाश्रिता । आवन्ती, विदिशा, सौराष्ट्रं, मालवः,सिन्धुः, सौवीरः,आनर्तः, अर्बुदेयः, दशार्णः, त्रिपुरः, मृत्तिकावतम्, एते देशाः आवन्तिकां प्रवृत्तिमाश्रयन्ति ।तदुक्तम् – "आवन्तिका वैदिशिका सौराष्ट्रा मालवस्तथा । सैन्धवास्त्वथ सौवीरा आनर्ताः सार्बुदेयकाः ॥ दाशार्णास्त्रैपुराश्चौव तथा वै मार्तिकावताः । कुर्वन्त्यावन्तिकीमेते प्रवृत्तिं नित्यमेव तु ॥ सात्त्वतीं कैशिकीं चौव वृत्तिमेषां समाश्रिताः । भवेत् प्रयोगो नाट्येऽत्र स तु कार्यः प्रयोक्तृभिः॥ [xxxii]" इति।

**३. औढ्रमागधी प्रवृत्तिः** [xxxiii] दृ अङ्गः, वङ्गः, कलिङ्गः, वत्सः, उढ्रः, मगधः, पौण्ड्रः, नेपालः, अन्तर्गिरः, बहिर्गिरः, प्लवङ्गमः, मलदः, मल्लवर्तकः, ब्रह्मोत्तरः, भार्गवः, मार्गवः, प्राग्जोतिषः, पुलिन्दः, वैदेहः, ताम्रलिप्तः एषु देशेषु औढ्रमागधी प्रवृत्तिः युज्यते । तदुक्तम् – "अङ्गा वङ्गा कालिङ्गाश्च वत्साश्चौवोढ्रमागधाः । पौण्ड्रा नेपालकाश्चैव अन्तर्गिरिबहिर्गिराः ॥ तथा प्लवङ्गमा ज्ञेया मलदा मल्लवर्तकाः । ब्रह्मोत्तरप्रभृतयो भार्गवा मार्गवास्तथा ॥ प्राग्ज्योतिषा

पुलिन्दाश्च वैदेहास्ताम्रलिप्तकाः । प्राङ्गा प्रावृतयश्चौव युञ्जन्तीहोद्रमागधीम् ॥ [xxxiv]" इति।

४. **पाञ्चाली प्रवृत्तिः** दृ एषा पाञ्चालमध्यमेत्यपि कथ्यते । अस्यामारभटी–सात्त्वत्यौ वृत्ती भवतः । पाञ्चालः, शूरसेनः, काश्मीरः, हस्तिनापुरः, बाह्लीकः, शल्यः, मद्रः, उशीनरः, गङ्गानद्याः उत्तरे हिमवत्पर्वतप्रदेशः एते पाञ्चालीवृत्तिमाश्रिताः । तदुक्तम् – पाञ्चाला शौरसेनाश्च काश्मीरा हस्तिनापुराः । बाह्लीका शल्यकाश्चौव मद्रकौशीनरास्तथा ॥ हिमवत्संश्रिता ये तु गङ्गायाश्चोत्तरां दिशम् । ये श्रिता वै जनपदास्तेषु पाञ्चालमध्यमाः ॥ पाञ्चालमध्यमायास्तु सात्त्वत्यारभटी स्मृता । [xxxv] इति।

7. **सिद्धी** दृ दैवी सिद्धिः, मानुषी सिद्धिश्चेति सिद्धिस्तु द्विविधा अपि च सा वाङ्मनोऽङ्गसमुद्भवा । मानुषी–सिद्धिः दशाङ्गयुता अपि च दैवी–सिद्धिः द्विविधा। [xxxvi] तदुक्तम् दृ"सिद्धिस्तु द्विविधा ज्ञेया वाङ्मनोऽङ्गसमुद्भवा । दैवी च मानुषी चैव नानाभावसमुत्थिता ॥ दशाङ्गा मानुषी सिद्धिर्दैवी तु द्विविधा स्मृता । नानासत्त्वाश्रयकृता वाङ्नेपथ्यशरीरजा"॥ [xxxvii] इति ।

8. **स्वराः** दृ शारीराः अर्थात् शरीरादुत्पन्नाः अपि च वैणाः अर्थात् वीणादि वाद्यैः निष्पन्नाः स्वराः सप्तप्रकारकाः । ते षड्जः, निषादः, ऋषभः, गान्धारः, मध्यमः, पञ्चमः, धैवतश्च । तदुक्तम् "शारीराश्चौव वैणाश्च सप्त षड्जादयः स्वराः ।
निषादर्षभगान्धारमध्यपञ्चमधैवताः" ॥ [xxxviii] इति ।

9. **आतोद्यम्** दृ ततं, अवनद्धं, घनं, सुषिरं चेति चतुर्विधम् आतोद्यम् वाद्यं वा । तन्त्रीगतं वाद्यं ततम् ।अवनद्यं पौष्करम् वाद्यम् ।घनस्तु तालवाद्यम् । सुषिरवाद्यं तु वंशः वेणुर्वा। [xxxix] तदुक्तमदृ "ततं चौवावनद्धं च घनं सुषिरमेव च । चतुर्विधं च विज्ञेयमातोद्यं लक्षणान्वितम् ।ततं तन्त्रीगीतं ज्ञेयमवनद्धं तु पौष्करम् । घनस्तु तालो विज्ञेयः सुषिरो वंश एव च"॥ **[xl]** इति।

10. **गानम्** – ध्रुवायोगसमन्वित [xli] गानं प्रवेशकम्, आक्षेपकं, निष्क्रामकं, प्रासादिकम्, आन्तरं चेति पञ्चविधम् । तदुक्तम्– "प्रवेशाक्षेपनिष्क्रामप्रासादिकमथान्तरम् । गानं पञ्चविधं ज्ञेयं ध्रुवायोगसमन्वितम्" ॥ **[xlii]** इति।

11. **रङ्गः** – चतुरश्रः, विकृष्टः, त्र्यश्रः चेति रङ्गः त्रिविधः भरतेनोक्तः । तदेवम्– "चतुरश्रो विकृष्टश्च रङ्गस्त्र्यश्रश्च कीर्तितः" ॥ **[xliii]** इति।

**ग्रन्थसूची**


1. भरतमुनिप्रणीतं नाट्यशास्त्रम् – हिन्दी व्याख्याकारः सम्पादकश्च डा. पारसनाथद्विवेदी – सम्पूर्णानन्द संस्कृतविद्यालयः वारणसी –१९९६
2. The Natyashastra of Bharatamuni – सम्पादकः मनमोहनघोशः – The Royal Asiatic Society of Bengal , Culcutta & 1951
3. नाट्यशस्त्रम् श्रीमदभिनवगुप्ताचार्यविरचितविवृतिसमेतम् – सम्पादकः एम् रामकृष्णकविः – ओरियेण्टल् इन्स्टिट्यूट् बरोडा – १९३४
4. भरतमुनिप्रणीतं नाट्यशास्त्रम् – सम्पादकौ डा॥ रविशङ्कर नागर , के एल् जोषि – परिमलप्रकाशनम् देहली –२०१२
5. नाट्यशास्त्रम् – कन्नडानुवादः आद्यरङ्गाचार्यः – नी.ना.सं. अक्षरप्रकाशनं, हेग्गोडु दृ १९८४
6. अभिनयदर्पणम् – सम्पादकः मनमोहनघोशः – Metropolitan Printing & Publishing House Limited कल्कत्ता –१९३४ ।


---

[i] नाट्यशास्त्रम् अ–६ श्लो–१० ।

[ii] नाट्यशास्त्रम् अ–६ श्लो–१६ । अभिनवगुप्तस्तु नवरसान् वक्ति । तदेवम्– "तेन प्रथमं रसाः । ते च नव । शान्तापलापिन–स्त्वष्टाविति पठन्ति ।" इति । नाट्यशास्त्रस्य केषाञ्चित् प्रतिषु शान्तरसस्य विवरणम् अष्टानां रसानां विवरणादनन्तरम् उपलभ्यते । किन्तु आदौ आष्टौ नाट्ये रसाः स्मृताः इत्येव वर्तते ।

[iii] नाट्यशास्त्रम् अ–६ श्लो–३३,३४ अपि च तत्पूर्वे विद्यमानः गद्यभागः । विभावानुभावानां विवरणं– अथ विभाव इति कस्मात् । उच्यते – विभावो विज्ञानार्थः । विभावः कारणं निमित्तं हेतुरिति पर्यायाः । विभाव्यन्तेऽनेन वागङ्गसत्त्वाभिनया इत्यतो विभावः । यथा विभावितं विज्ञातमित्यनर्थान्तरम् । अत्र श्लोकः – बहवोऽर्था विभाव्यन्ते वागङ्गाभिनयाश्रयाः । अनेन यस्मात्तेनायं विभाव इति संज्ञितः ॥ अनुभाव इति कस्मात् । उच्यते– अनुभाव्यतेऽनेन वागङ्गसत्त्वकृतोऽभिनय इति । अत्रश्लोकः – वागङ्गाभिनयेनेह यतस्त्वर्थोऽनुभाव्यते । शाखाङ्गोपाङ्गसंयुक्तस्त्वनुभावस्ततः स्मृतः ॥ (ना.शा. अ–७ श्लो४,५ गद्यभागश्च)

[iv] इदं रससूत्रमधिकृत्यैव भट्टलोल्लटस्य उत्पत्तिवादः, श्रीशङ्कुकस्य अनुमितिवादः, भट्टनायकस्य भुक्तिवादः, अभिनवगुप्तस्य अभिव्यक्तिवादः च प्रवृत्ताः ।

[v] नाट्यशास्त्रम् अ–६ श्लो–३३,३४ अपि च तत्पूर्वे विद्यमानः गद्यभागः ।

[vi] नाट्यशास्त्रम् अ–७ श्लो–१,२ ।

[vii] नाट्यशास्त्रम् अ–६ श्लो–१८ ।

[viii] नाट्यशास्त्रम् अ–६ श्लो–१९–२२ ।

[ix] नाट्यशास्त्रम् अ–६ श्लो–२३ ।

[x] नाट्यशास्त्रम् अ–८ श्लो ६,७ तत्पूर्वे विद्यमानं गद्यञ्च ।

[xi] नाट्यशास्त्रम् अ–८ श्लो ६ ।

[xii] अभिनयदर्पणम् श्लो ३९,४० ।

[xiii] नाट्यशास्त्रम् अ–१३ श्लो–७० । अपि च "लोकधर्मी नाट्यधर्मी धर्मी तु द्विविधः स्मृतः ।" ना.शा अ–६ श्लो २५ ।

[xiv] नाट्यशास्त्रम् अ–१३ श्लो ७१,७२ ।

[xv] अर्थात् वाक्यक्रियासत्त्वभावाः लोकव्यवहारापेक्षया अधिकाः वर्तन्ते इति मम मतम् । अभिनवगुप्तस्तु –"इतिहासादिवाक्यमतिक्रम्य या उचितरञ्जकेतिवृत्तकल्पनात्मिका क्रिया । यथा राजशेखरेण रामनिर्वासनार्थं दशरथवेषराक्षसविरचिततत्त्वकल्पना, तथा यदुपेतम् । भावं सत्त्वं स्वभावं चित्तवृत्तिञ्चातिक्रम्य यत्स्थितं कविकल्पितचित्तवृत्त्यन्तरयुक्तमित्यर्थः।" इति अतिवाक्यादीनां विवरणं ददाति ।

[xvi] "सर्वालङ्कारसंयुक्तं" इति पाठान्तरमपि युक्तमिति भाति ।

[xvii] "यत्र च पुरुषो न स्वरूपे तिष्ठति , अपि तु स्त्रीबलमाश्रयति । प्रयोज्यः पुरुषो यत्र न स्वरूपस्थः अपि तु स्त्रिया प्रयुज्यते तन्नाट्यधर्मी। " इत्यभिनवगुप्तः ।

[xviii] ना.शा अ–१३ श्लो

[xix] ना.शा अ–२० श्लो १–२५ ।

[xx] "भरतैरिति नटैः स्वतो वंशकरं नामधेयं येषां तैः, भरतसन्तानत्वात्तद्धिते भरताः।" इत्यभिनवगुप्तः ।

[xxi] नाट्यशास्त्रम् अ–२० श्लो–२६ ।

[xxii] भेदास्तस्यास्तु विज्ञेयाश्चत्वारोऽङ्गत्वमागता । प्ररोचनामुखं चौव वीथी प्रहसनं तथा ॥ नाट्यशास्त्रम् अ–२० श्लो २७ ।

[xxiii] "सात्त्वतो गुणः मनसो व्यापारः । सत्सत्वं प्रकाशः तद्विद्यते यत्र तत्सत्वं मनः, तस्मिन् भवः" इत्यभिनवगुप्तः ।

[xxiv] नाट्यशास्त्रम् अ–२० श्लो–४१ ।

[xxv] उत्थापकश्च परिवर्तकश्च सल्लापकश्च सङ्घात्यः । चत्वारोऽस्या भेदा विज्ञेया नाट्यतत्त्वज्ञैः ॥ नाट्यशास्त्रम् अ–२० श्लो–४४ ।

[xxvi] नाट्यशास्त्रम् अ–२० श्लो–५३ ।

[xxvii] नर्म च नर्मस्फुञ्जो नर्मस्फोटोऽत्र नर्मगर्भश्च । कैशिक्याश्चत्वारो भेदा ह्येते समाख्याताः ॥ नाट्यशास्त्रम् अ–२० श्लो–५६ ।

[xxviii] नाट्यशास्त्रम् अ–२० श्लो–६४ ।

[xxix] सङ्क्षिप्तकावपातौ वस्तूत्थापनमथापि संफेटः । एते ह्यस्या भेदा लक्षणमेषां प्रवक्ष्यामि ॥ नाट्यशास्त्रम् अ–२० श्लो–६७ ।

[xxx] नाट्यशास्त्रम् अ–१३ श्लो–३७ ।

[xxxi] नाट्यशास्त्रम् . अ–१३ श्लो ३८,३९,४०, तत्पूर्वे विद्यमानः गद्यभागश्च ।

[xxxii] नाट्यशास्त्रम् अ–१३ श्लो–४१,४२,४३ ।

[xxxiii] "तत्र प्राग्दशानां सीमात्वेन दक्षिणत ऊद्राः समुद्रनिकटे उत्तरतो मागधाः तदुभयमध्यवर्तित्वादूद्रमागधा, अत एवोद्रकलिङ्गानामुभयोपजीवित्वाभिप्रायेण वृत्तिद्वयमध्ये गणनम् ।" इत्यभिनवगुप्तः ।

[xxxiv] नाट्यशास्त्रम् अ–१३

[xxxv] नाट्यशास्त्रम् अ–१३ श्लो–४८,४९,५० ।

---

[xxxvi] अत्र भरतमुनिना मानुषीसिद्धिः दशाङ्गा अपि च दैवीसिद्धिः द्विविधा इत्युक्तम् । परन्तु तेषां विवरणं सङ्ख्याम् अनुसृत्य नास्ति । तत्रादौ मानुषीसिद्धिः दृ स्मितापहासिनी हासा साध्वहो कष्टमेव च । प्रबद्धनादा च तथा सिद्धिर्ज्ञेयाथ वाङ्मयी ॥ पुलकैश्च सरोमाञ्चौरभ्युत्थानैस्तथैव च । चेलदानाङ्गुलिक्षेपैः शारीरी सिद्धिरिष्यते ॥ नाट्यशास्त्रम् अ–२७ श्लो–४,५ । अत्र केचित् वाङ्मयी पञ्चधा शारीरी पञ्चधा इति वदन्ति । केचित्तु वाङ्मयी सप्त शरीरी तिस्रः इति । अभिनवगुप्तेन मतद्वयमपि उक्तम् । दैवीसिद्धिः – या भावातिशयोपेता सत्त्वयुक्ता तथैव च । सा प्रेक्षकैस्तु कर्तव्या दैवी सिद्धिः प्रयोगतः ॥ न शब्दो यत्र न क्षोभो न चोत्पातनिदर्शनम् । सम्पूर्णता च रङ्गस्य दैवी सिद्धिस्तु सा स्मृता ॥ नाट्यशास्त्रम् अ–२७ श्लो–१६,१७ । अत्र द्विविधा दैवीसिद्धिः कथमिति अभिनवगुप्तेनापि नोक्तम्।

[xxxvii] नाट्यशास्त्रम् . अ–२७ श्लो–२,३ ।

[xxxviii] नाट्यशास्त्रम् अ–६ श्लो–२८ ।

[xxxix] आतोद्यम्–आतूद्यते अभिहन्यत इत्यर्थः। पोष्करम् दृ पुषकरशब्दश्रवणादाहतं पुष्करवर्तकदेवताधिष्ठितं पद्मपत्राकारं चर्मपुटभाषं चेति पौष्करम् । घनः– हन्यते कलासाम्यार्थमिति घनः । अत एव तालैकप्रमाणत्वात्स्वरवर्णसम्भवात्ताल इत्युक्तः कांस्यतालादिः । " इत्यभिनवगुप्तः ।

[xl] नाट्यशास्त्रम् अ–६ श्लो–२९,३० ।

[xli] ध्रुवागानस्यविषये नाट्यशास्त्रे ३२तमे अध्याये विस्तृतं विवरणमुपलभ्यते ।

[xlii] नाट्यशास्त्रम् अ–६ श्लो–३१ । एतेषां विवरणम् अभ्नवगुप्तेन एवमुक्तम् –"पात्रस्य प्रवेशे भावप्रकृत्यवस्थादिसूचकं यद्गीयते तत्प्रवेशगानम् । प्रविष्टस्यान्तर्गतां चित्तवृत्तिं सामाजिकाप्राप्तिं प्रसादयितुं प्रथयितुं प्रसादगानम् । रसान्तरोपक्षेपार्थमाक्षेपगानम् । आन्तरमिति गतिपरिक्रमणनिरूपणादिरवसरः । तत्र यद्गीयते तदान्तरं गानम् । पात्रस्यनिष्क्रमणे तु निष्क्रामगानम् ।" इति ।

[xliii] नाट्यशास्त्रम् अ–६ श्लो–३२ । नाट्यशास्त्रे रङ्गविषये इतोप्यधिकविवरणं नोपलभ्यते ।